# Rishigautamaproktam Umamaheshvara Dhyanam

# ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરધ્યાનમ્

## Document Information

Text title : Rishigautamaproktam Umamaheshvara Dhyanam

File name : umAmaheshvaradhyAnam.itx

Category : shiva, shivarahasya, dhyAnam

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 188-207.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરધ્યાનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

ગૌતમ ઉવાચ

મુક્તામાલાપરીતાઙ્ગં દુકૂલપરિવેષ્ટિતમ્ ।
પઞ્ચાનનમુમાકાન્તમનન્તેન્દુરવિપ્રભમ્ ॥ ૧૮૮॥

ચન્દ્રાર્ધશેખરં નિત્યં જટામકુટમણ્ડિતમ્ ।
ત્રિપુણ્ડ્રરેખાવિલસદ્ભાલભાગમનામયમ્ ॥ ૧૮૯॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગં રુદ્રાક્ષાભરણાન્વિતમ્ ।
મન્દસ્મિતમુખામ્ભોજમાધારં જગતાં પ્રભુમ્ ॥ ૧૯૦॥

વેદૈરનન્તૈરનિશં સ્તૂયમાનમનેકધા ।
વેદાત્મકં વેદવેદ્યં વિષ્ણુબ્રહ્માદિવન્દિતમ્ ॥ ૧૯૧॥

વિષ્ણુનેત્રાર્ચિતં ભક્તકલ્પદ્રુમમુમાપતિમ્ ।
અપ્રતિદ્વન્દ્વમદ્વન્દ્વં સર્વવૃન્દારકાર્ચિતમ્ ॥ ૧૯૨॥

સર્વોત્તમમનાદ્યન્તં સર્વદેવનિષેવિતમ્ ।
ઋતં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ॥ ૧૯૩॥

ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપં ચિદાત્મકમ્ ।
નિષ્કલં નિર્ગુણં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ॥ ૧૯૪॥

અપ્રમેયં જગજ્જન્મસ્થિતિસંહારકારણમ્ ।
વિશ્વબાહું વિશ્વપાદં વિશ્વાક્ષં વિશ્વશમ્ભુવમ્ ॥ ૧૯૫॥

વિશ્વં નારાયણારાધ્યમક્ષરં પરમં પદમ્ ।
વિશ્વતઃ પરમં નિત્યં વિશ્વસ્યેશમનામયમ્ ॥ ૧૯૬॥

- -

એવં ધ્યાત્વા મહાદેવં સર્વદેવોત્તમોત્તમમ્ ।

ધ્યાયેત્તતઃ પરં ગૌરીમાદિવિદ્યામનામયામ્ ॥ ૧૯૭॥

- -

લક્ષ્મીસેવિતપાદાબ્જાં શચીસેવિતપાદુકામ્ ।
સરસ્વત્યાદિભિર્નિત્યં સ્તૂયમાનપદામ્બુજામ્ ॥ ૧૯૮॥

અધરોષ્ઠાધરીભૂતપક્વબિમ્બફલામિમામ્ ।
મુખકાન્તિકલોદ્ધૂતપૂર્ણચન્દ્રાં શિવાત્મિકામ્ ॥ ૧૯૯॥

તિરસ્કૃતાલિમાલાં તામલકાવલિભિઃ સદા ।
પીનવક્ષોજનિર્ધૂતચક્રવાકવરાઙ્ગનામ્ ॥ ૨૦૦॥

નિત્યાં તિરસ્કૃતામ્ભોજનયનાં વિશ્વમાતરમ્ ।
સીમન્તધિક્કૃતાશેષકામભલ્લામહર્નિશમ્ ॥ ૨૦૧॥

ભ્રુકુટીનિર્જિતાનઙ્ગચાપાં ભક્તજનેષ્ટદામ્ ।
બાહુનાલપ્રભોદ્ધુતહેમનાલાં વિલાસિનીમ્ ॥ ૨૦૨॥

રોમરાજિતિરોભૂતસમ્ભ્રમભ્રમરાવલિમ્ ।
નાભિરન્ધ્રતિરોભૂતઘનાવર્તોમિવર્તુલામ્ ॥ ૨૦૩॥

ઉત્તમોરુતિરોભૂતરમ્ભાસ્તમ્ભાં શુભાવહામ્ ।
પાદયુગ્મપ્રભાપૂરનિર્જિતારુણપઙ્કજામ્ ॥ ૨૦૪॥

બ્રહ્મેન્દ્રોપેન્દ્રજનનીં મહેશાર્ધાઙ્ગભાગિનીમ્ ।
મહેશાશ્લિષ્ટવામાઙ્ગાં વરદાભયદાં સદા ॥ ૨૦૫॥

પ્રસન્નવદનામ્ભોજાં સ્મિતપૂર્વાભિભાષિણીમ્ ।
સર્વશૃઙ્ગારવેષાઢ્યાં નાનાભરણભૂષિતામ્ ॥ ૨૦૬॥

દેવૈર્વેદૈશ્ચ વેદાન્તૈઃ સ્તૂયમાનાત્મવૈભવામ્ । ૨૦૭.૧
(એવં ધ્યાત્વા તથાબાહ્યાપ્યુપચારાન્પ્રકલ્પયેત્ ॥)

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરધ્યાનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૧૮૮-૨૦૭.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 188-207.1..

Notes:

Ṛṣi Gautama ઋષિ ગૌતમ while describing to the King, the procedure of UmāMaheshvara Vrata ઉમામહેશ્વરવ્રત that is to commence on Bhādrapada Śukla Caturdaśī ભાદ્રપદ શુક્લ ચતુર્દશી for observation on Bhādrapada Pūrṇimā ભાદ્રપદ પૂર્ણિમા; elaborates about the UmāMaheshvara Dhyānam ઉમામહેશ્વર ધ્યાનમ્.
In this Chapter 22, Ṛṣi Gautama ઋષિ ગૌતમ further details about the UmāMaheshvara Pūjā ઉમામહેશ્વર પૂજા by external means.

Proofread by Ruma Dewan

---

*Rishigautamaproktam Umamaheshvara Dhyanam*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*